## वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः । (२७/३०६८)

णेः [1]इत्यनुवर्तते । [2]दम् शम् पूरी दस् स्पश् छद् ज्ञप् इत्येतेषां ण्यन्तानां धातूनां वा अनिट्त्वं निपात्यते । दान्तः, दमितः । शान्तः, शमितः । पूर्णः, पूरितः । [3]दस्तः, दासितः । स्पष्टः, [4]स्पाशितः । छन्नः, छादितः । ज्ञप्तः, [5]ज्ञपितः । इट्प्रतिषेधो णिलुक् च निपात्यते । ज्ञप्तेस्तु भरज्ञपिसनाम् इति विकल्पविधानात् 'यस्य विभाषा' (७. २. १५/३०२५) इति नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं निपातनम् ॥

## रुष्यमत्वरसङ्घुषास्वनाम् । (२८/३०६९)

[6]वा इति वर्तते । रुषि अम त्वर सङ्घुष आस्वन इत्येतेषां निष्ठायां वा इडागमो न भवति । रुष्टः, रुषितः । [7]'तीषसहलुभरुषरिषः' (४. २. १०२/१३२७) इति विकल्पविधानात् 'यस्य विभाषा' (७. २. १५/३०२५) इति प्रतिषेधे प्राप्ते [8]विकल्पार्थं वचनम् । अम – अभ्यान्तः, अभ्यमितः । त्वर – तूर्णः, त्वरितः । 'आदितश्च' (७. २. १६/३०३५) इति प्रतिषेधे प्राप्ते [9]वचनम् । सङ्घुष – सङ्घुष्टौ पादौ, सङ्घुषितौ पादौ । सङ्घुष्टं वाक्यमाह, सङ्घुषितं वाक्यमाह । सङ्घुष्टौ दम्यौ, सङ्घुषितौ दम्यौ । सम्पूर्वस्य घुषेरविशब्दनेऽपि परत्वादयमेव विकल्पो भवति । आस्वन – आस्वान्तो देवदत्तः, आस्वनितो देवदत्तः । आस्वान्तं मनः, आस्वनितं मनः । आङ्पूर्वस्य स्वनेर्मनोऽभिधानेऽपि परत्वादयं[10] विकल्पः क्षुब्धस्वान्त (७. २. १८/३०५८) इति निपातनं बाधते ॥

## हृषेर्लोमसु । (२९/३०७०)

[11]लोमसु वर्तमानस्य हृषेर्निष्ठायां वा इडागमो न भवति । हृष्टानि लोमानि, हृषितानि लोमानि । हृष्टं लोमभिः, [12]हृषितं लोमभिः । हृष्टाः केशाः, हृषिताः केशाः । हृष्टं केशैः हृषितं केशैः । 'हृषु [13]अलीके' (धा. पा. ७०९) इत्युदित्वान् निष्ठायामनिट्, 'हृष तुष्टौ' (धा. पा. १२३०) इत्ययं सेट्, [14]तयोरुभयोरिह ग्रहणम् इत्युभयत्र विभाषा इयम् । लोमानि [15]मूर्धजानि [16]अङ्गजानि च सामान्येन गृह्यन्ते, यथा लोमनखं स्पृष्ट्वा शौचं कर्तव्यम् इति । तद्विषये च [17]हर्षे वर्तमानो [18]लोमसु वर्तते इत्युच्यते । लोमसु इति किम् ? हृष्टो देवदत्त इत्यलीकार्थस्य, हृषितो देवदत्तः इति तुष्ट्यर्थस्य ।

[८३३] विस्मितप्रतिघातयोश्चेति वक्तव्यम् । (म.भा.३.२९०)

हृष्टो देवदत्तः, हृषितो देवदत्तः[19] । विस्मितः इत्यर्थः । हृष्टाः दन्ताः, हृषिताः दन्ताः । प्रतिहताः इत्यर्थः ॥

---

1. वर्तते क. 2. दान्तशान्तपूर्णदस्तस्पृष्टच्छन्नज्ञप्त इत्येते ण्यन्ता निष्ठायां निपात्यन्ते क. इ, दम्यादीनां धातूनां निष्ठायां वा इडागमो निपात्यते ब. 3. दसु हिंसायाम् दसु च इत्यधिकम् ह. 4. स्पशितः ड. 5. ज्ञापितः क. इ. ह. 6. वाक्यमिदं नास्ति क. 7. इट् इत्यधिकम् ब. ह. ड. 8. विकल्प इष्यते ई, इदं इत्यधिकम् ह. 9. अनेन विकल्पः क, अनेन विकल्पः प्राप्तः ई. 10. एव इत्यधिकम् क. 11. वा इति वर्त. इत्यधिकम् क. 12. उदाहरणमिदं नास्ति क. 13. आलीक्ये क. 14. तेन इत्यधिकम् क. 15. मूर्धजाः इते 16. स्वाङ्गजानि इ. 17. हृषिर्वर्तमानो क. 18. लोमसु नास्ति क. 19. इति इत्यधिकम् क.